नामांक Roll No.

Sl.No. :

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 30

No. of Printed Pages – 07

**VU–87–Sahit. Shas. (Supp.)**

यहाँ से काटिए

# वरिष्ठ उपाध्याय पूरक परीक्षा, 2018

## साहित्य – शास्त्रम्

**समय** : 3¼ **होराः**

**पूर्णांक** : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभि : सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

2) सर्वे प्रश्नाः अनिवार्याः।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः।

यहाँ से काटिए

1) प्रस्तुताप्रस्तुतानां च तुल्यत्वे कोऽलङ्कारो वर्तते? [1]

2) विभावनालङ्कारः कुत्र भवति? [1]

3) अविवक्षितवाच्यध्वनिः कतिविधोभवति? [1]

4) स्वाङ्कुरितव्यङ्ग्यं कतिविधम्? [1]

5) मुख्यार्थस्य अविवक्षायां का वृत्तिः भवति? [1]

6) गौः इत्यत्र कया अभिधा? [1]

7) यक्षः कुत्र वसतिं चक्रे? [1]

8) विन्ध्यपादे का विशीर्णा वर्तते? [1]

9) प्रतिमानाटकस्य रचयिता कः? [1]

10) सुमन्त्रः कः आसीत्? [1]

11) श्रृंगाररसस्य कवि भेदाः? नामानि लिखत। [2]

12) मधुरावृत्तिं निरूपयत। [2]

13) अस्फुट गुणीभूतव्यङ्ग्यस्य स्वरूपं लिखत। [2]

14) अभिधावृत्तेः स्वरूपं लिखत। [2]

15) ''नीचै'': इति पर्वतस्य महत्त्वं प्रतिपादनीयम्। [2]

16) कालिदासस्य रचनानां नामानि लेखनीयानि। [2]

17) प्रतिमानाटकस्य नामकरणस्य किं प्रयोजनम्? [2]

18) ''अनुचरति शशाङ्कं राहुदोषेऽपि ताराः।'' इति सूक्तेः सप्रसङ्गो भावार्थो लेखनीयः। [1+1=2]

19) निम्नलिखितालंकारयुग्मेषु कयोश्चिद् द्वयो: परस्परं भेद: प्रदर्शनीय:– [2+2=4]

क) विभावना – विशेषोक्ति:

ख) सहोक्ति: – समासोक्ति:

ग) तुल्ययोगिता – दीपकम्

20) निम्नांकितेषु द्वयोरूदाहरणयो: अलंकारौ परिचीय तयो: लक्षणोल्लेखपूर्वकं संगतिर्विधेया– [2+2=4]

क) 'तापेन भ्राजते सूर्य: शूरश्चापेन राजते'

ख) 'कुटिला: श्यामला: दीर्घा: कटाक्षा: कुन्तलाश्च ते'।

ग) 'मुञ्च मानं दिनं प्राप्तं मन्द नन्दी हरान्तिके'।

21) विवक्षितवाच्यध्वने: भेदान् सोदाहरणं विवेचयत। [4]

22) वाच्यसिद्ध्यङ्गम् अगूढञ्च सोदाहरणं विवेचयत। [4]

23) जयदेवानुसारं लक्षणाया: भेद–प्रभेदान् गणयत। [4]

24) मेघदूतानुसारम् उज्जयिनीवर्णनं स्वशब्देषु प्रतिपादनीयम् [4]

25) निम्नांकितयो: पद्ययो: कस्यचिदेकस्य सप्रसङ्गो भावार्थो लेखनीय: [1+3=4]

क) जातं वंशे भुवनविदिते पुष्कराऽवर्तकानां

जानामि त्वां प्रकृति पुरूषं कामरूपं मधोन:।

तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं

याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।।

ख) प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्

पूर्वोद्दिष्टामुपसर पुरीं श्रीविशालां विशालाम्।

स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां

शेषै:पुण्यैर्हृतमिव दिव: कान्तिमत् खण्डमेकम्।।

26) प्रतिमानाटकस्य द्वितीयाङ्कस्य कथासारो लेखनीय:। [4]

27) निम्नलिखितपद्ययो: कस्यचिदेकस्य छन्द: परिचीय तल्लक्षणं लेखनीयम्। लक्षणोदाहरणयो: संगतिश्च प्रदर्शनीया – [2+2=4]

क) ताते धनुर्नमयि सत्यमवेक्षमाणे,

मुञ्चानि मातरि शरं स्वधनं हरन्त्याम्।

दोषेषु बाह्यमनुजं भरतं हनानि,

किं रोषणाय रूचिरं त्रिषु पातकेषु।।

ख) नागेन्द्रा यवसाभिलाषविमुखाः सास्रेक्षणा वाजिनो,

हेषाशून्यमुखाः सवृद्धवनिता बालाश्च पौरा जनाः।

त्यक्ताहारकथाः सुदीनवदनाः क्रदन्त उच्चैर्दिशा

रामोयाति यया सदारसहजस्तामेव पश्यन्त्यमी।।

28) श्रृंगाररसस्वरूपं विविच्य तदुदाहरणमपि लेखनीयम् [6]

अथवा

चन्द्रालोकानुसारं चतस्रो रीतयो वर्णनीयाः

29) अधोलिखितयोः पद्ययोः कस्यचिदेकस्य सन्दर्भ–प्रसंग–अन्वयसहिता व्याख्या करणीया–[1+1+1+3=6]

क) त्वामारुढं पवनपदवीमुद्गृहीतालकान्ताः

प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः।

कः सन्नद्धे विरहविधुरां त्वच्युपेक्षेत जायां

न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः।।

ख) ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानि,

पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति।

धौतापाङ्गं हरशशिरूचा पावकेस्तं मयूरं,

पश्चादद्रिग्रहण गुरूभिर्गजितैर्नर्तयेथाः।।

**30)** अधोलिखितपद्ययोः कस्यचिदेकस्य सन्दर्भ–प्रसङ्ग–अन्वयसहिता व्याख्या करणीया **–[1+1+1+3=6]**

क) कर्णौ त्वरापहृतभूषण भुग्नपाशौ

संस्रंसिताभरणगौर तलौ च हस्तौ।

एतानि चाभरणभारनतानि गात्रे

स्थानानि नैव समतामुपयान्ति तावत्।।

ख) स्वर्गं गते नरपतौ सुकृतानुयात्रे

पौराश्रुपातसलिलैरनुगम्यमानः।

द्रष्टुं प्रयाम्य कृपणेषु तपोवनेषु

रामाभिधानमपरं जगतः शशाङ्कम्।।

DO NOT WRITE ANYTHING HERE